International Journal of Sanskrit Research 2019; 5(5): 137-138

International Journal of Sanskrit Research
अनन्ता

**ISSN: 2394-7519**
IJSR 2019; 5(5): 137-138
© 2019 IJSR
www.anantaajournal.com
Received: 16-07-2019
Accepted: 20-08-2019

**Anup Ruidas**
Assistant Professor,
Dept.of Sanskrit, Govt. General Degree College, Salboni, Bhimpur, Paschim Medinipur, West Bengal, India

**Correspondence**
**Anup Ruidas**
Assistant Professor,
Dept.of Sanskrit, Govt. General Degree College, Salboni, Bhimpur, Paschim Medinipur, West Bengal, India

# राजनीतिलीलामृते सन्त्रासवाद

## अनुप–रुइदास

**प्रस्तावना**

राजनीतिरेव समाजस्य तथा राष्ट्रस्य प्रधानचालिकाशक्तिः। राजनीतिप्रभावेन देशस्य जनाः प्रतिष्ठितेषु विभिन्नेषु गोष्ठीषु तेषां मतादर्शं प्रदर्शयन्ति। एतेषु दलेषु कोऽपि दलः जनसमर्थनमादाय देशपरिचालनायै स्वीकृतिं प्राप्नोति। राष्ट्रान्तर्गतेषु दलेषु क्षमतारक्षार्थं जमप्रियतालाभार्थञ्च तैः विभिन्नोपायान् अवलम्व्यन्ते। किन्तु साम्प्रतिककाले दुष्टराष्ट्राः उत्तमोपायं परित्यज्य असदोपायम–वलम्वयन्ति। तेषु मन्दोपायेषु सन्त्रासवादोऽन्यतमः।

आधुनिकसंस्कृतकविः दीपकघोषः स्वदेशे तथा विश्वे विद्यमानेषु देशान्तरेषु प्रायो प्रतिदिनं हिंसात्मकं कार्यकलापं संपश्य तच्चित्रं 'राजनीतिलीलामृतम् ' इत्याख्ये ग्रन्थे उपस्थापितवान्।

राजनीतिरेव देशविभागस्य कारणम्। सर्वे जानन्ति यद् भारतवर्षं यदा आङ्गलसर्वकारस्य अधीने तदा देशोऽखण्डः आसीत्। किन्तु राजनीतिप्रभावेन अखण्डभारतवर्षस्य भूमिः विखण्डिता भवति। स्वाधीनोत्तरकाले देशविभागस्य फलरूपेण पाकिस्ताननामकस्य देशान्तरस्य सृष्टिरभवत्। तदनन्तरं पाकिस्तानदेशो वांलादेश इति भूमिखण्डेन विखण्डितोऽभवत्। नेतृणां मस्तिष्कप्रसूता राजनीतिः हि देशविभाग–धर्मगतोद्वास्त्वादीनां समस्यानां कारणस्वरूपा।

स्वाधीनोत्तरकाले भारतवर्षः अनेकप्रदेशे विभक्तः वर्तते। तेषु राज्येषु प्रदेशेषु वा काश्मीरराज्यं स्वतन्त्रप्रदेशरुपेन गन्यते। अस्य राज्यस्य नैसर्गिकं सौन्दर्यं विश्वे सर्वेषां जनानां दृष्टिमाकर्षति। काश्मीरराज्यं भूस्वर्ग इति परिचीयते। किन्तु पाकिस्तानदेशः काश्मीरलाभाय सर्वदैव भारतवर्षं प्रति ईर्षापरायनो वर्तते। किञ्च युद्धं देहि मनोभावपरायनः। पाकिस्तानदेशस्य सन्त्रासवादिनः प्रायो भारतवर्षमागत्य हत्यालीलां ध्वंसलीलाञ्च सम्पादयन्ति। काश्मीरप्रदेशे वहवः सन्त्रासवादिनः आत्मगोपनं कृत्वा वसन्ति। एवं यथासमये ते भारतीयजनानामुपरि ध्वंसलीलां सम्पादयितुमा–क्रमन्ति। सन्त्रासवादिभिः यः हिंसात्मकः कार्यकलापः क्रियते तद्कारणं राजनीतिः। अपि च सन्त्रासवादिनः भारतीयसीमान्तरक्षकानामुपरि युद्धविरतिरीतिं लङ्घयित्वा वारं वारमाक्रमन्ति। एतेन वहवः सीमान्तरक्षिणः म्रियन्ते। सर्वमेतत् राजनीतिकारणम्। किन्तु पाकिस्तानप्रदेशस्य राजनीति–विदः सर्वदा निर्दुष्टा इव आचरन्ति। वस्तुतः तेषामङ्गुलिनिर्देशेनैव सन्त्रासवादिनः निर्भयं भारत–माक्रमन्ति। राजनीतिविदः जानन्ति यत् भारतेन सह युद्धं साक्षाद्विवादश्च नियमविरुद्धः। राष्ट्रपुञ्जे समालोचनावशाद् ते साक्षादाक्रमणं न कुर्वन्ति। परन्तु सन्त्रासवादिनं नियोजयन्ति। तेषां सन्त्रासेन अकाले भारतीयजनाः रक्षकाश्च म्रियन्ते।

युद्वक्षेत्रे सैनिकैः युद्धं क्रियते। तेषां सैनिकानां परिवारस्थाः स्वजनाः चिन्ताग्रस्तमातिष्ठन्ति। रक्षकानां गृहं प्रत्यावर्तनार्थं परिवारस्थस्वजनाः अपेक्षन्ते। क्वचिद् प्रतिवेशिदेशसैनिकैः क्वचिद्वा सन्त्रासवादिभिः अकाले एव तेषां मृत्युर्भवति। मृतसैनिकस्वजनानां ह्रदयविदारिवेदनया क्रन्दनैश्च धरित्री कम्पिता भवति। तदुक्तं कविना दीपकघोषमहाभागेन 'राजनीति–लीलामृतम' इत्याख्ये ग्रन्थे–

> "हताहतानां युवसैनिकानां गेहस्थनिःस्वप्रियवान्धवानाम्।
> स्त्रीसूनुकन्याजननीपितृणां नभोविकीर्णाखिलदिग्दिशानाम्।।"इति
> (राजनीतिलीलामृतम्–६५)

किञ्च मृतसैनिकानां स्त्रीजनाः अकालवैधव्यं प्राप्नुवन्ति। एवं पत्नीनां सीमन्तरेखा चिरं न दृश्यते। अङ्कशून्याः मातरः आर्तनादं कुर्वन्ति। सर्वमेतद् राजनीतिकारणम्। तदुक्तं कविना दीपकमहाभागेन–
"स्वदेशमातुर्युववीर सैनिकाः सीमान्तरेखादृढ़रक्षणव्रताः।

> सीमन्तिनीनां प्रियनाथवल्लभाः सीमान्तरेखां न चिरं ररक्षु"।।इति
> (राजनीतिलीलामृतम्–६८)

यतः राजनैतिकजनाः सैनिकान् अस्त्ररुपेण व्यवहरन्ति। परमाण्वादिविस्फोटकैः पृथिव्याः कीदृशं भयंकररूपं भवति तच्चित्रं कविना वर्णितम्। जापानदेशस्य हिरोसिमा–नागासाकी इति नगरद्वये आमेरिकादेशेन विस्फोटकपातो क्रियते स्म। आमेरिकादेशस्य नेतारः स्वार्थस्य पूरणाय एतादृशीं ध्वंसलीलां सम्पादितवन्तः। किन्तु तस्य फलरूपेण यच्चित्रं दृश्यन्ते तत् स्मरणमात्रेण नयने जलमागच्छति। एषा ऐतिहासिकघटना सर्वे जानन्ति। परमाणुविस्फोरणेन लक्षाधिकाः साधारण–जनाः मृताः आसन्। नैके अङ्गविकलाः सन्तः मृता इव जीवननिर्वाहं कुर्वन्ति। समग्रनगरद्वयं जनहीनं इवातिष्ठत्। विस्फोटकप्रभावेन वायु: दुषितोऽभवत्। विस्फोटकप्रभावो इदानीन्तन समयेऽपि दृश्यते। साम्प्रतमपि जापनदेशे क्वचित् क्वचित् शिशवः मातृगर्भाद् विकलाः जायन्ते। तदुक्तं कविना–

"तवैव दौर्धष्यविषाक्तवायुना विध्वस्तुलुप्ताङ्गविशेषतन्वा।
शिशुर्युव वृद्धजनः शनैः शनैर्जीवन्मृतत्वं क्रमगाहमानाः।।" इति
(राजनीतिलीलामृतम्–४०)

राजनीतिः जलस्थलान्तरिक्षेषु विस्फोटकाद्यायुधैः आत्मानं भूषितवती। राजनीतिनेतारः एव स्वेषां स्वार्थचरितार्थाय तैरायुधैः ऐतिहासिकनिदर्शनानां ध्वंसं कुर्वन्ति। एतेन अस्माकं इतिहासो विलुप्तो भवति। दृश्यन्ते विविधाः स्मृतिसौधाः विनष्टाः। यथा आफगानप्रदेशे भगवतः बुद्धदेवस्य मूर्तिः विनष्टा इति कविना वर्णितम्। अपि तु भौगोलिकमानचित्रमपि ध्वस्तं भवति। वस्तुतो विश्वस्य इतिहासः भौगोलिकमानचित्रञ्च राजनीत्या निर्णीयते। तदुक्तं कविना–

"चित्राङ्गसंस्थाननिवेशरूपचित्राणि वान्येव पुरात्नकानि।
आसन् धरण्या अचिरं विलोप्य तान्यन्यथा नूत्नतया विधत्से।।"इति
(राजनीतिलीलामृतम्–१०८)

सन्त्रासवादिभिः आमेरिकादेशे या ध्वंसलीला सम्पादिता सा तु सर्वे एव जानन्ति। २००१खीष्टवर्षे सप्तम्वरमासस्य एकादशदिनाङ्के लादेन इति कश्चन सन्त्रासवादिनेता विमानयानेन आमेरिकायाः 'वतसक ज्तंकम ब्मदजतम' इति संस्थानस्य ध्वंसं कारयितवान्। सन्त्रासवादिभिः ध्वंसलीलासंपादनाय व्यवहृतानि आकाशयानानि तद्देशादेव अपहृतानि।
साम्प्रतिकसमयेऽपि भारतवर्षं वारं वारं सन्त्रासवादिनः आक्रमन्ति। जम्मुकाश्मीरप्रदेशस्य सीमान्तरेखायां १९९९खीष्टवर्षे कार्गिलनामकं युद्धमभवत्। विगते वर्षे पञ्जावप्रदेशस्य गुरुदासपुरे पाठानकोट इत्यत्र स्थाने अस्मिनवर्षे उरि–नौसेरासेक्टरे कृष्णघाटिनामके स्थानेऽपि आत्महत्याकारिणा उग्रवादिना स्फोटः कृतः। एतेन अनेके भारतीयसैनिकाः म्रियन्ते। दुरदर्शने मृतसैनिकपरिजनानां हृदयवेदना पत्नीनां सीमाहीनं क्रन्दनञ्च सर्वेषां नयने जलमानयतः।
किञ्च न केवलं भारतवर्षे अपि तु समग्रविश्वे अधुना सन्त्रासवादिसम्प्रदायानां कार्यकलापो दृश्यते। एवं तत्फलरूपेण भयंकरचित्रं संपश्य सर्वदेशेषु जनाः भीताः सन्त्रस्ताश्च जायन्ते। अन्तिमे राजनीतिजनानां समीपे प्रार्थना यत् तैः देशविभागो न करणीयः। यतो देशविभागेन उद्वास्तुसमस्या धर्मगनसमस्या च सञ्जायेते। सन्त्रासवादिजनानां समीपेऽपि मम प्रार्थना ते सन्त्रासवादकार्यकलापं परित्यज्य समाजे मानवधर्मानुसारं आचरेयुः। यत् पारस्परिकविद्वेषात् स्वभ्रातर एव म्रियन्ते।

## संदर्भ


1. घोषः, दीपकः, राजनीतिलीलामृतम्, राष्ट्रीय–संस्कृत–संस्थानम्, नव–देहली१९९९।
2. विलापपञ्चिका, मानव–संसाधन–विकाशमन्त्रकः, १९८१।
3. मुखोपाध्यायः, रमारञ्जनः,, राजनीतिलीलामृतम् (अनुवादसहितम्), आशांवरी पावलिकेशन्, हाओरा २००२।
4. दासः, नारायनः, संस्कृतसाहित्ये पश्चिमवङ्गस्यावदानम्, कथाभारती,नरेन्द्रपुरम्, २०१३।
5. चट्टोपाध्यायः, सुरेशचन्द्र, संस्कृतसाहित्ये वाङालीर दान, संस्कृत–पुस्तक–भाण्डार, कलिकाता, १९९३।